# Maddhyandinanamoshadhyanuvakah

# માદ્ધ્યન્દિનાનામોષધ્યનુવાકઃ

## Document Information

Text title : Oshadhi Sukta mAddhyandinAnAm

File name : mAddhyandinAnAmoShadhyanuvAkaH.itx

Category : veda, svara, sUkta

Location : doc_veda

Transliterated by : Mandar Kulkarni

Proofread by : Mandar Kulkarni

Latest update : March 3, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2025

*sanskritdocuments.org*

# માદ્ધ્યન્દિનાનામોષધ્યનુવાકઃ

માદ્ધ્યન્દિનસંહિતાયાં દ્વાદશોઽદ્ધ્યાયે ષષ્ઠોઽનુવાકઃ ।
આ પઞ્ચસપ્તતાયા ઋચ આ એકોત્તરશતતમામ્ (૭૫-૧૦૧) સપ્તવિંશત્યૃચોઽનુવાકઃ ।
કાણ્વસંહિતાયા નાતિભિન્નમપિ માદ્ધ્યન્દિનાનામુચ્ચારણવૈવિધ્યદર્શનાય
પૃથક્ પ્રદર્શ્યતે -
હરિઃ ઓ૩મ્ ॥

## સસ્વરઃ

યા ઓષધીઃ પૂર્વ્વા જાતા દેવેબ્ભ્યસ્ત્રિયુગં પુરા ।
મનૈ નુ બબ્ભ્રુણામહꣳ શતં ધામાન સપ્તચ ॥ ૧॥

શતં વો અમ્બ ધામાનિ સહસ્રમુત વો રુહઃ ।
અધા શતક્ક્ત્વો યૂયમિમં મે અગદં કૃત ॥ ૨॥

ઓષધીઃ પ્રતિ મોદદ્ધ્વં પુષ્પવતીઃ પ્રસૂવરીઃ ।
અશ્શ્વા ઇવ સજિત્ત્વરીર્વ્વીરુધઃ પારયિષ્ણવઃ ॥ ૩॥

ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપ બ્બ્રુવે ।
સનેયમશ્શ્વં ગાં વ્વાસ આત્માનં તવ પૂરુષ ॥ ૪॥

અશ્શ્વત્થે વો નિષદનં પણ્ર્ણે વો વસતિષ્કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ ૫॥

યત્રૌષધીઃ સમગ્ગ્મત રાજાનઃ સમિતાવિવ ।
વ્વિપ્રઃ સ ઉચ્ચતે ભિષગ્ગ્રક્ષોહામીવચાતનઃ ॥ ૬॥

અશ્શ્વાવતીꣳ સોમાવતીમૂર્જ્જયન્તીમુદોજસમ્ ।
આઽવિત્સિ સર્વ્વા ઓષધીરસ્મા અરિષ્ટ્તાતયે ॥ ૭॥

ઉચ્છુષ્મા ઓષધીનાં ગાવો ગોષ્ઠાદિવેરતે ।
ધનઁ સનિષ્ષ્યન્તીનામાત્માનં તવ પૂરુષ ॥ ૮॥

ઇષ્કૃતિર્ન્નામ વો માતાડથો યૂયઁ સ્થ નિષ્કૃતીઃ ।
સીરાઃ પતત્ત્રિણી સ્ત્થન યદામયતિ નિષ્કૃથ ॥ ૯॥

અતિ વિશ્શ્વાઃ પરિષ્ઠા સ્તેન ઇવ વ્વ્રજમક્ક્રમુઃ ।
ઓષધીઃ પ્પ્રાચુચ્ચ્યવુર્ય્યત્ત્કિઞ્ચ તન્ન્વો રપઃ ॥ ૧૦॥

યદિમા વ્વાજયન્નહમોષધીર્હસ્ત આદધે ।
આત્મા યક્ષ્મસ્ય નશ્શ્યતિ પુરા જીવગૃભો યથા ॥ ૧૧॥

યસ્યૌષધીઃ પ્પ્રસર્પ્પથાઙ્ગમઙ્ગં પરુષ્ષ્પરુઃ ।
તતો યક્ષ્મં વ્વિબાદધ્વ ઉગ્ગ્રો મદ્ધ્યમશીરિવ ॥ ૧૨॥

સાકઁ ય્યક્ષ્મ પ્પ્રપત ચાષેણ કિકિદીવિના ।
સાકં વ્વાતસ્ય ધ્ધ્રાજ્જ્યા સાકન્નશ્શ્ય નિહાકયા ॥ ૧૩॥

અન્ન્યા વો અન્ન્યામવત્ત્વન્ન્યાન્ન્યસ્યા ઉપાવત ।
તાઃ સર્વાઃ સંવિદાના ઇદમ્મે પ્પ્રાવતા વ્વચઃ ॥ ૧૪॥

યાઃ ફલિનીર્ય્યા અફલા અપુષ્પ્પા યાશ્ચ પુષ્પ્પિણીઃ ।
બૃહસ્પ્પતિપ્રસૂત્તાસ્તા નો મુઞ્ચન્ત્વઁ હસઃ ॥ ૧૫॥

મુઞ્ચન્તુ મા શપત્થ્યાદથો વ્વરુણ્યાદુત ।
અથો યમસ્ય પડ્વીશાત્ત્સર્વ્વસ્માદ્દેવકિલ્બ્બિષાત્ ॥ ૧૬॥

અવપતન્તીરવદન્ દિવ ઓષધયસ્પ્પરિ ।
ય જીવમશ્નવામહૈ ન સ રિષ્ષ્યાતિ પૂરુષઃ ॥ ૧૭॥

યા ઓષધીઃ સોમરાજ્ઞીર્બ્બહ્વીઃ શતવિચક્ષણાઃ ।
તાસામસિ ત્ત્વમુત્તમારં કામાય શઁ હૃદે ॥ ૧૮॥

યા ઓષધીઃ સોમરાજ્ઞીર્વ્વિષ્ઠિતાઃ પૃથિવીમનુ ।
બૃહસ્પ્પતિપ્પ્રસૂતા અસ્યૈ સન્દત્ત વ્વીર્યમ્ ॥ ૧૯॥

યાશ્શ્ચેદમુપશ◌ૃણ્વન્તિ યાશ્શ્ચ દૂરં પરાગતાઃ ।
સર્વ્વાઃ સઙ્ગત્ત્ય વ્વીરુધોસ્યૈ સન્દત્ત વ્વીર્ય્યમ્ ॥ ૨૦॥

મા વો રિષત્ખનિતા યસ્મૈ ચાહં ખનામિ વઃ ।
દ્વિપાચ્ચતુષ્પાદસ્માકઁ સર્વ્વમસ્ત્વનાતુરમ્ ॥ ૨૧॥
ઓષધયઃ સમવદન્ત સોમેન સહ રાજ્ઞા ।
યસ્મૈ કૃણોતિ બ્બ્રાહ્મણસ્તઁ રાજન્પારયામસિ ॥ ૨૨॥
નાશયિત્રી બલાસસ્યાર્શસ ઉપચિતામસિ ।
અથો શતસ્ય યક્ષ્માણાં પાકારોરસિ નાશની ॥ ૨૩॥
ત્વાં ગન્ધર્વ્વા અખનઁસ્ત્વામિન્દ્રસ્ત્વાં બૃહસ્પતિઃ ।
ત્વામોષધે સોમો રાજા વ્વિદ્વાન્યક્ષ્માદમુચ્ચ્યત ॥ ૨૪॥
સહસ્વ મે અરાતીઃ સહસ્વ પૃતનાયતઃ ।
સહસ્વ સર્વ્વં પાપ્માનઁ સહમાનાસ્યોષધે ॥ ૨૫॥
દીર્ઘાયુસ્ત ઓષધે ખનિતા યસ્મૈ ચ ત્વા ખનામ્મ્યહમ્ ।
અથો ત્વં દીર્ઘાયુર્બ્ભૂત્ત્વા શતવલ્શા વ્વિરોહતાત્ ॥ ૨૬॥
ત્વમુત્તમાસ્યોષધે તવ વ્વૃક્ષા ઉપસ્તયઃ ।
ઉપસ્તિરસ્તુ સોસ્માકઁ યો અસ્માઁ અભિદાસતિ ॥ ૨૭॥

## નિઃસ્વરઃ

યા ઓષધીઃ પૂર્વ્વા જાતા દેવેબ્ભ્યસ્ત્રિયુગં પુરા ।
મનૈ નુ બબ્ભ્રુણામહ શતં ધામાન સપ્તચ ॥ ૧॥

શતં વો અમ્બ ધામાનિ સહસ્રમુત વો રુહઃ ।
અધા શતક્રત્ત્વો યૂયમિમં મે અગદં કૃત ॥ ૨॥

ઓષધીઃ પ્રતિ મોદદ્ધ્વં પુષ્પવતીઃ પ્રસૂવરીઃ ।
અશ્વા ઇવ સજિત્ત્વરીર્વ્વીરુધઃ પારયિષ્ણવઃ ॥ ૩॥

ઓષધીરિતિ માતરસ્તદ્વો દેવીરુપ બ્બ્રુવે ।
સનેયમશ્વં ગાં વ્વાસ આત્માનં તવ પૂરુષ ॥ ૪॥

અશ્વત્થે વો નિષદનં પર્ણ્ણે વો વસતિષ્કૃતા ।
ગોભાજ ઇત્કિલાસથ યત્સનવથ પૂરુષમ્ ॥ ૫॥

યત્રૌષધીઃ સમગ્ગ્મત રાજાનઃ સમિતાવિવ ।
વ્વિપ્રઃ સ ઉચ્ચ્યતે ભિષગ્ગ્રક્ષોહામીવચાતનઃ ॥ ૬॥

અશ્શ્વાવતીં સોમાવતીમૂર્જ્જયન્તીમુદોજસમ્ ।
આડવિત્સિ સર્વ્વા ઓષધીરસ્મા અરિષ્ટ્તાતયે ॥ ૭॥

ઉચ્છુષ્મ્મા ઓષધીનાં ગાવો ગોષ્ટ્ઠાદિવેરતે ।
ધનં સનિષ્ષ્યન્તીનામાત્માનં તવ પૂરુષ ॥ ૮॥

ઇષ્કૃતિર્ન્નામ વો માતાડથો યૂયં સ્થ નિષ્કૃતીઃ ।
સીરાઃ પતત્ત્રિણી સ્ત્થન યદામયતિ નિષ્કૃથ ॥ ૯॥

અતિ વિશ્શ્વાઃ પરિષ્ઠા સ્ત્તેન ઇવ વ્વ્રજમક્ક્રમુઃ ।
ઓષધીઃ પ્પ્રાચુચ્ચ્યવુર્ય્યત્કિઞ્ચ તન્ન્વો રપઃ ॥ ૧૦॥

યદિમા વ્વાજયન્નહમોષધીર્હસ્ત આદધે ।
આત્મા યક્ષ્મસ્ય નશ્શ્યતિ પુરા જીવગૃભો યથા ॥ ૧૧॥

યસ્યૌષધીઃ પ્પ્રસર્પ્પથાઙ્ગમઙ્ગં પરુષ્ષ્પરુઃ ।
તતો યક્ષ્મં વ્વિબાદધ્વ ઉગ્ગ્રો મદ્ધ્યમશીરિવ ॥ ૧૨॥

સાકઁ ય્યક્ષ્મ પ્પ્રપત ચાષેણ કિકિદીવિના ।
સાકં વ્વાતસ્ય ધ્ધ્રાજ્જ્યા સાકન્નશ્શ્ય નિહાકયા ॥ ૧૩॥

અન્ન્યા વો અન્ન્યામવત્ત્વન્ન્યાન્ન્યસ્યા ઉપાવત ।
તાઃ સર્વાઃ સંવિદાના ઇદમ્મે પ્પ્રાવતા વ્વચઃ ॥ ૧૪॥

યાઃ ફલિનીર્ય્યા અફલા અપુષ્પ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પ્પતિપ્રસૂત્તાસ્તા નો મુઞ્ચન્ત્વં હસઃ ॥ ૧૫॥

મુઞ્ચન્તુ મા શપત્થ્યાદથો વ્વરુણ્યાદુત ।
અથો યમસ્ય પડ્ડીશાત્ત્સર્વ્વસ્માદ્દેવકિલ્બિષાત્ ॥ ૧૬॥

અવપતન્તીરવદન્ દિવ ઓષધયસ્પ્પરિ ।
ય જીવમશ્ન્નવામહૈ ન સ રિષ્ષ્યાતિ પૂરુષઃ ॥ ૧૭॥

યા ઓષધીઃ સોમરાજ્ઞીર્બ્બહ્વીઃ શતવિચક્ષણાઃ ।
તાસામસિ ત્ત્વમુત્તમારં કામાય શં હૃદે ॥ ૧૮॥

યા ઓષધીઃ સોમરાજ્ઞીર્વ્વિષ્ઠિતાઃ પૃથિવીમનુ ।

બૃહસ્પ્પતિપ્પ્રસૂતા અસ્યૈ સન્દત્ત વ્વીર્યમ્ ॥ ૧૯॥

યાશ્શ્ચેદમુપશ‍ૃણ્વન્તિ યાશ્શ્ચ દૂરં પરાગતાઃ ।
સર્વ્વાઃ સઙ્ગત્ત્ય વ્વીરુધોસ્યૈ સન્દત્ત વ્વીર્ય્યમ્ ॥ ૨૦॥

મા વો રિષત્ત્ખનિતા યસ્મ્મૈ ચાહં ખનામિ વઃ ।
દ્વિપાચ્ચતુષ્પ્પાદસ્માકં સર્વ્વમસ્ત્વનાતુરમ્ ॥ ૨૧॥

ઓષધયઃ સમવદન્ત સોમેન સહ રાજ્ઞા ।
યસ્મ્મૈ કૃણોતિ બ્બ્રાહ્મણસ્તં રાજન્ન્પારયામસિ ॥ ૨૨॥

નાશયિત્રી બલાસસ્યાર્શસ ઉપચિતામસિ ।
અથો શતસ્ય યક્ષ્માણાં પાકારોરસિ નાશની ॥ ૨૩॥

ત્વાં ગન્ધર્વ્વા અખનઁસ્ત્ત્વામિન્દ્રસ્ત્ત્વાં બૃહસ્પ્પતિઃ ।
ત્વામોષધે સોમો રાજા વ્વિદ્વાન્ન્યક્ષ્માદમુચ્ચ્યત ॥ ૨૪॥

સહસ્વ મે અરાતીઃ સહસ્વ પૃતનાયતઃ ।
સહસ્વ સર્વ્વં પાપ્પ્માનં સહમાનાસ્યોષધે ॥ ૨૫॥

દીર્ગ્ઘાયુસ્ત ઓષધે ખનિતા યસ્મ્મૈ ચ ત્ત્વા ખનામ્મ્યહમ્ ।
અથો ત્ત્વં દીર્ગ્ઘાયુર્બ્ભૂત્ત્વા શતવલ્શા વ્વિરોહતાત્ ॥ ૨૬॥

ત્વમુત્તમાસ્યોષધે તવ વ્વૃક્ષા ઉપસ્ત્તયઃ ।
ઉપસ્તિરસ્તુ સોસ્માકઁ ય્યો અસ્માઁ અભિદાસતિ ॥ ૨૭॥

Encoded and proofread by Mandar Kulkarni

*Maddhyandinanamoshadhyanuvakah*
pdf was typeset on June 1, 2025

Please send corrections to *sanskrit@cheerful.com*